श्री कामकळाकाळी भुजंग प्रयात स्तोत्रं

श्री कामकळाकाळी भुजंग प्रयात स्तोत्रं

महाकाल उवाच |
अथ वक्ष्ये महेशानि देव्याः स्तोत्रमनुत्तमम् |
यस्य स्मरणमात्रेण विघ्ना यांति पराङ्मुखाः || 1 ||

विजेतुं प्रतस्थे यदा कालकस्या-
-सुरान् रावणो मुंजमालिप्रवर्हान् |
तदा कामकाळीं स तुष्टाव वाग्भि-
-र्जिगीषुर्मृधे बाहुवीर्येण सर्वान् || 2 ||

महावर्तभीमासृगब्ध्युत्थवीची-
-परिक्षाळिता श्रांतकंथश्मशाने |
चितिप्रज्वलद्वह्निकीलाजटाले-
-शिवाकारशावासने सन्निषण्णाम् || 3 ||

महाभैरवीयोगिनीडाकिनीभिः
कराळाभिरापादलंबत्कचाभिः |
भ्रमंतीभिरापीय मद्यामिषास्रा-
-न्यजस्रं समं संचरंतीं हसंतीम् || 4 ||

महाकल्पकालांतकादंबिनीत्विट्-
परिस्पर्धिदेहद्युतिं घोरनादाम् |
स्फुरद्द्वादशादित्यकालाग्निरुद्र-
-ज्वलद्विद्युदोघप्रभादुर्निरीक्ष्याम् || 5 ||

लसन्नीलपाषाणनिर्माणवेदि-
-प्रभश्रोणिविंबां चलत्पीवरोरुम् |
समुत्तुंगपीनायतोरोजकुंभां
कटिग्रंथितद्वीपिकृत्युत्तरीयाम् || 6 ||

स्रवद्रक्तवल्गन्नृमुंडावनद्धा-
-सृगावद्धनक्षत्रमालैकहाराम् |
मृतब्रह्मकुल्योपक्लुप्तांगभूषां
महाट्टाट्टहासैर्जगत्त्रासयंतीम् || 7 ||

निपीताननांतामितोद्वृत्तरक्तो-
-च्छलद्धारया स्नापितोरोजयुग्माम् |
महादीर्घदंष्ट्रायुगन्यंचदंच-
-ल्ललल्लेलिहानोग्रजिह्वाग्रभागाम् || 8 ||

चलत्पादपद्मद्वयालंबिमुक्त-
-प्रकंपालिसुस्निग्धसंभुग्नकेशाम् |
पदन्याससंभारभीताहिराजा-
-ननोद्गच्छदात्मस्तुतिव्यस्तकर्णाम् || 9 ||

महाभीषणां घोरविंशार्धवक्त्रै-
-स्तथासप्तविंशान्वितैर्लोचनैश्च |
पुरोदक्षवामे द्विनेत्रोज्ज्वलाभ्यां
तथान्यानने त्रित्रिनेत्राभिरामाम् || 10 ||

लसद्द्वीपिहर्यक्षफेरुप्लवंग-
-क्रमेलर्क्षतार्क्षद्विपग्राहवाहैः |
मुखैरीदृशाकारितैर्भ्राजमानां
महापिंगळोद्यज्जटाजूटभाराम् || 11 ||

भुजैः सप्तविंशांकितैर्वामभागे
युतां दक्षिणे चापि तावद्भिरेव |
क्रमाद्रत्नमालां कपालं च शुष्कं
ततश्चर्मपाशं सुदीर्घं दधानाम् || 12 ||

ततः शक्तिखट्वांगमुंडं भुशुंडीं
धनुश्चक्रघंटाशिशुप्रेतशैलान् |
ततो नारकंकालबभ्रूरगोन्मा-
-दवंशीं तथा मुद्गरं वह्निकुंडम् || 13 ||

अधो डम्मरुं पारिघं भिंदिपालं
तथा मौशलं पट्टिशं प्राशमेवम् |
शतघ्नीं शिवापोतकं चाथ दक्षे
महारत्नमालां तथा कर्तृखड्गौ || 14 ||

चलत्तर्जनीमंकुशं दंडमुग्रं
लसद्रत्नकुंभं त्रिशूलं तथैव |
शरान् पाशुपत्यांस्तथा पंच कुंतं
पुनः पारिजातं छुरीं तोमरं च || 15 ||

प्रसूनस्रजं डिंडिमं गृध्रराजं
ततः कोरकं मांसखंडं श्रुवं च |
फलं बीजपूराह्वयं चैव सूचीं
तथा पर्शुमेवं गदां यष्टिमुग्राम् || 16 ||

ततो वज्रमुष्टिं कुणप्पं सुघोरं
तथा लालनं धारयंतीं भुजैस्तैः |
जवापुष्परोचिष्फणींद्रोपक्लुप्त-
-क्वणन्नूपुरद्वंद्वसक्तांघ्रिपद्माम् || 17 ||

महापीतकुंभीनसावद्धनद्ध
स्फुरत्सर्वहस्तोज्ज्वलत्कंकणां च |
महापाटलद्योतिदर्वीकरेंद्रा-
-वसक्तांगदव्यूहसंशोभमानाम् || 18 ||

महाधूसरत्त्विड्भुजंगेंद्रक्लुप्त-
-स्फुरच्चारुकाटेयसूत्राभिरामाम् |
चलत्पांडुराहींद्रयज्ञोपवीत-
-त्विडुद्भासिवक्षःस्थलोद्यत्कपाटाम् || 19 ||

पिषंगोरगेंद्रावनद्धावशोभा-
-महामोहबीजांगसंशोभिदेहाम् |
महाचित्रिताशीविषेंद्रोपक्लुप्त-
-स्फुरच्चारुताटंकविद्योतिकर्णाम् || 20 ||

वलक्षाहिराजावनद्धोर्ध्वभासि-
-स्फुरत्पिंगळोद्यज्जटाजूटभाराम् |
महाशोणभोगींद्रनिस्यूतमूंडो-
-ल्लसत्किंकणीजालसंशोभिमध्याम् || 21 ||

सदा संस्मरामीदृशों कामकाळीं
जयेयं सुराणां हिरण्योद्भवानाम् |
स्मरेयुर्हि येऽन्येऽपि ते वै जयेयु-
-र्विपक्षान्मृधे नात्र संदेहलेशः || 22 ||

पठिष्यंति ये मत्कृतं स्तोत्रराजं
मुदा पूजयित्वा सदा कामकाळीम् |
न शोको न पापं न वा दुःखदैन्यं
न मृत्युर्न रोगो न भीतिर्न चापत् || 23 ||

धनं दीर्घमायुः सुखं बुद्धिरोजो
यशः शर्मभोगाः स्त्रियः सूनवश्च |
श्रियो मंगळं बुद्धिरुत्साह आज्ञा
लयः सर्व विद्या भवेन्मुक्तिरंते || 24 ||

इति श्री महाकालसंहितायां दशम पटले रावण कृत श्री कामकळाकाळी भुजंग प्रयात स्तोत्रम् ||